International Journal of Sanskrit Research 2024; 10(2): 223-226

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 223-226
© 2024 IJSR
www.anantaajournal.com
Received: 13-01-2024
Accepted: 16-02-2024

**Ganeswara Mahanta**
Ph.D. Research Scholar, Sanskrit Sahitya, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Ganeswara Mahanta**
Ph.D. Research Scholar, Sanskrit Sahitya, National Sanskrit University, Tirupati, Andhra Pradesh, India

# इन्द्राणीसप्तशतीस्तोत्रकाव्ये छन्दविवेचनम्

**Ganeswara Mahanta**

**प्रस्तावना**

संस्कृतकाव्यजगति स्तोत्रकाव्यस्य स्थानं स्वतन्त्रमेव । स्तोत्रकाव्यस्य परम्परा अतीव प्राचीनं प्रसिद्धं च वर्त्तते। वैदिककालादारभ्यः एतावत् पर्यन्तं अस्माकं कवयः स्तोत्रकाव्यान्यि विरचयन्त सन्ति । केचननानि प्रसिद्धानि संस्कृतस्तोत्रकाव्यानि भवन्ति यथा - पुष्पदत्तस्य शिवमहिम्नस्तोत्रम्, मयुरभट्टस्य सूर्यशतकम्, बाणभट्टस्य चण्डिशतकम्,शङ्कराचार्यस्य शिवापराधक्षमास्तोत्रम् । स्तोत्रकाव्यं पद्यकाव्यस्य भेदः इति कारणेन पद्यकाव्यमिव वहुभिः छन्दोभिः रचितं भवति । 1878 तमवर्षे आन्ध्रप्रदेशस्य एकः ऐतिहासिके प्रसिद्धनगरे कलुवराई इति ग्रामे लब्धजन्मः वासिष्ठगणपतिमुनिः । अयं महान् कविः राष्ट्रसेवकः,संस्कृतरक्षकः, समाजसेवकश्च आसीत् । अनेन महाकविना अनेकानि स्तोत्रकाव्यनि रचितम् । महाकवेः तेषु स्तोत्रकाव्येषु प्रसिद्धानि भवन्ति, उमासहस्रम्,इन्द्राणीसप्तशती, प्रचण्डत्रिशति, उमाशतकम्, उमात्रिशति, इन्द्रसहस्रनामस्तोत्रम् च । पुनः कवेः एतेषु प्रसिद्धेषु स्तोत्रकाव्येषु इन्द्राणीसप्तशती अतीव प्रसिद्धं वर्त्तते । काव्येऽस्मिन् भारतस्य गतवैभवस्य पुनः प्राप्तये कविः वासिष्ठगणपतिमुनिः देवीमिन्द्राणीं पुनः पुनः प्रार्थयति । देव्याः इन्द्राण्याः स्तवनकाले कविना सप्तवैदिकछन्दसां प्रयोगं अस्य काव्यस्य काव्यस्यसौन्दर्यं वर्धयति ।

**छन्दशब्दस्य वित्पत्तिः** छन्दस् शब्दः (नपु) छदि- आह्लादने दीप्तौ (भ्वादि आत्मनेपदि- सेट्) इति धातोः चन्देशदेश्च छ उणादि 4-219 इति असुन् प्रत्यये छन्दस् शब्दः निष्पन्नः भवति । "चन्दते आह्लादयितीति छन्दः"[1]

**छन्दसः महत्वम्**

पाणिनायशिक्षायां वर्णनमस्ति यत् वेदपुरुषस्य छन्दः पादोऽस्ति । अतः छन्दः विना वेदः, पादं विना पुरुषः पङ्गुसदृश्येव । यथा –

छन्दः पादौतु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते[2] ।।

---

[1] अ.को-2-7-22 श्लोकः रामश्री व्याख्या

[2] पाणिनीयशिक्षा – कारिका- 41

निरुक्तस्य टिकाकारः दुर्गाचार्यः मुक्तकण्ठेन उक्तः यत् - " छन्दः विना वाण्याः स्थितिर्नास्ति" । भरतमुनिना अपि तस्य नाट्यशास्त्रे छन्दसः ऐकान्तिं स्थितिं अङ्गीकृत्य वदति यत् - "छन्दोऽहनी न शब्दोऽस्ति न छन्दः शब्दवर्जितम्[3]" । तथैव कात्यायनेन उक्तं - समग्रवेदवाङ्मयः छन्दमयोऽस्ति । तादृशः कोऽपि शब्दः नास्त यः छन्दः विना निर्माणमस्ति । यथा – "छन्दभुतमिदं सर्वं वाङमयं स्याद् विजानतः, नाश्चन्दसि न या पृष्ठे शब्दश्चरति कश्चनः[4]"

**छन्दः भेदः**

आदौ छन्दसां विभाजनं द्विधा क्रियते वैदिकछन्दः लौकिकछन्दश्च इति । वृत्तिकारेण कात्यायनेन उक्तमस्ति यत् – " यदक्षरपरिमाणं तत्छन्दः" इतः स्पष्टं भवति छन्दः अक्षराणां परिमाणात्मकं स्वरुपमस्ति । अस्मात् कारणादेव वैदिकाः छन्दासि अक्षरगणनया नाम ज्ञायते । वैदिकसाहित्ये प्रयुक्तः छन्दः वैदिकछन्दः उच्यते तथैव लौकिकसाहित्ये प्रयुक्तः छन्दः लौकिकछन्दः इति उच्यते । वैदिकछनदासि यथा – गायत्री,उष्णिकं,अनुष्टुप्,वृहत्ती इत्यादय । लौकिकाः छन्दासि -आर्या, इन्द्रवज्रा,अनुष्टुप् इत्यादय ।

**इन्द्राणीसप्तशतीस्तोत्रकाव्ये छन्दविवेचनम्**

अयं महाकविः वासिष्ठगणपतिमुनिः वेदस्य गुढरहस्यम् अधितवान्। यस्य वेदवेदाङ्गेषु अतीव निपुणाता आसीत् । तस्य काव्यकृत्तिषु अपि वेदस्य प्रभावः बहुलतया दृस्यते । अनेन महाकविना स्वविरचिते इन्द्राणीसप्तशतीस्तोत्रकाव्ये सप्तवैदिकछन्दसां प्रयोगं सुन्दरतया कृतम् ।

**1.1 गायत्री छन्द**

गायत्री छन्दसः लक्षणप्रसङ्गे आचार्य्यपिङ्गलेन स्वविरचिते पिङ्गलसूत्रे उक्तम् – गायत्र्या वसवः[5] । गायत्र्याः पादो वसवोऽष्टाक्षराणि भवन्ति । यत्र गायत्र्याः पादोऽभिधास्यते तत्रष्टाक्षरो ग्राह्य । गायत्री छन्दः एकपादतः पञ्चपादं यावत् भवन्ति । अयं महाकविः तस्य इन्द्राणीसप्तशतीस्तोत्रकाव्यस्य गायत्रशतके सर्वाग्रे गायत्रीछन्दसः शशिवदनपादस्य प्रोयगं कृतवान् । अस्य लक्षणं वर्त्तते – शशिवदना न्यौ[6] । यदि प्रतिपादं नगणयगणौ स्तः तदा – "शशिवदना" नाम छन्दः भवति । यथा काव्ये –

त्वमखिलकार्येष्वयि धृतसक्तिः ।
उरुगतिरस्य प्रभुतमशक्तिः[7] ।।

तथैव गायत्री छन्दसः स्तनुमध्यायाः लक्षणं - त्यौ स्तस्तनुमध्या[8] यदि प्रत्येकस्मिन् पादे आदौ तगण तदनु यगणः आयाति तदा तनुमध्या भवति । यथा -

ध्वान्तं परिहर्तुं तेजांस्यापि भर्तुम् ।
अन्तर्जगदम्बा हासं कुरपतान्मे[9] ।।

**1.2 उष्णिकछन्दः**

इन्द्राणीसप्तशतीस्तोत्रकाव्ये उष्णिकछन्दसः प्रयोगं कविना बहु सुन्दरतया कृतम् । अस्य छन्दसः लक्षणमस्ति यत् – उष्णिग्गायत्रौ जागतश्च[10] । यत्र गायत्रावष्टाक्षरौ पादौ, जागतश्च द्वादशक्षरः, एवं त्रिभिः, उष्णिग् नाम छन्दः भवति । अत्र च क्रमो न विवक्षितः । पादसंख्यामात्रं विधीयते । वृत्तरत्नाकरे उष्णिकछन्दसः कुमारललितस्य लक्षणं वर्त्तते - कुमारललिता ज्सौ ग्[11] । यदि प्रतेकस्मिन् पादे एकः जगणः,एकः सगणः, तथा एकः गुरुः भवति तत्र कुमारललिताछन्दः भवति । इन्दणीसप्तशतीस्तोत्रकाव्ये अस्य प्रयोगं कविना वासिष्टगणपतिमुनिना कृतम् –

सुरेश्वरमहिष्याः स्मितं शशिसितं मे ।
तनोतु मतिमच्छा बलमग्रयम् ।।

उष्णिकमधुमतीपादः छन्दसः लक्षणम – मधुयदि ननगाः[12] । यदि प्रतिपादं द्वौ 2 नगणौ एको गुरुश्च भवेत् तदा मधु नामः छन्दः । अस्यैव मधुमती इति संज्ञान्तरम् । इन्द्राणीसप्तशतीस्तोत्रकाव्ये अस्य छन्दसः कविना अनेन प्रकारेण प्रयोगं कृतम् –

दिशि दिशि प्रसरद्रुचितमोदमनम् ।
हरतु मे दुरितं हरिवधूहसितम्[13] ।।

---

[3] नाट्यशास्त्र-14-45
[4] ऋग्यजु- परिशिष्टे
[5] पिङ्गलसूत्रम् -3.3
[6] रत्नप्रभोपेते वृत्तरत्नाकर कारिका -08
[7] इन्द्राणी सप्तशतीस्तोत्रकाव्यस्य श्लोकः -05, गायत्री शतकं शशिवदनपादः
[8] वृतरत्नाकरम् कारिका -07
[9] इन्द्राणी सप्तशतीस्तोत्रकाव्यस्य श्लोकः -26, गायत्री शतकं स्तनुमध्यापादः
[10] पिङ्गलसूत्रम् -3-18
[11] वृत्तरत्नाकरम् कारिका -13
[12] वृत्तरत्नाकरम् कारिका-11
[13] इन्द्राणीसप्तशतीस्तोत्रकाव्यम् श्लोकः -176 द्वितीयमौष्णिहं शतकम्

### 1.3 अनुष्टुभछन्दः

इन्द्राणीसप्तशतीस्तोत्रकाव्ये अनुष्टुप् छन्दसः प्रयोगं कविना कृतम्। आचार्य्यः पिङ्गलने अनुष्टुप् छन्दसः लक्षणं कृतवान् यत् – अनुष्टुव् गायत्रैः[14] । गायत्रैरष्टाक्षरैः पादैश्चतुष्पाच्छन्दः अनुष्टुप् संज्ञं भवति। अनुष्टुप् छन्दे पादचत्वारः भवन्ति । प्रत्यके पादे गायत्री छन्दः वत् अष्टाक्षरणि भवन्ति । एतस्य छन्दसः एकः भेदः चित्रपादा अस्ति । एतस्य लक्षणमस्ति यत् - भौ गिति चित्रपदा गः[15] । यत्र पादे भगणौ गुरू च स्याताम् सा चित्रपदा नाम पदान्ते यतिः । इन्द्राणीसप्तशतीस्तोत्रकाव्ये यथा –

अप्यलसो हरिदन्तध्वान्ततेरपि हर्ता ।
अस्तु ममेन्द्रपुरन्धी हासलवः शुभकर्ता [16] ।।

अनुष्टुभछन्दसः माणवकस्य लक्षणमस्ति – माणवकं भात्तलगाः[17]। यदि क्रमे भगणः,तगणः तथा लघु-गुरुवो भवेयुः तदा माणवकं छन्दः भवति । अस्य छन्दसः प्रयोगं इन्द्राणीसप्तशतीस्तोत्रकाव्ये कविना सुन्दरतया कृतम् । यथा –

शक्ततमा शक्रवधू हासविभा मे हरतु ।
मानसमार्गवरकं जेतुमशक्यं तिमिरम् ।।

### 1.4 वृहत्तीछन्दः

इन्द्राणीसप्तशतीस्तोत्रकाव्ये वृहती छन्दसः प्रयोगचातुरी दृश्यते । अस्य छन्दसः लक्षणं पिङ्गलाचार्येण कृतमस्ति यत् -वृहती जागतत्रयश्च गायत्र्याः[18] । एको जागतः पादः,त्रयश्च गायत्राः, तदा वृहती नाम छन्दः भवति । अस्य छन्दसः एकः भेदः हलमुखी वर्तते । अस्य लक्षणं वृत्तरत्नाकरे -रान्नसाविह हलमुखी[19] ।रगणात् अननतरं नगणसगणौ स्यातां चेत्,इह छन्दः शास्त्रे हलमुखी इति उच्यते । यथा इन्द्राणीसप्तशतीस्तोत्रकाव्ये –

ब्रह्मणश्चितिरथनभः कायभागवगतिमती ।
या तदा पृथगिव बभौ धर्मितां स्वयमपि गता[20] ।।

अस्य छन्दसः अन्येकः भेदः भुजगशिशुभृता । एतस्य लक्षणं रत्नप्रभोपेते वृत्तरत्नाकरे – भुजगशिशुभृता नौ मः[21] । द्वौ नगणौ एकश्च मगणश्चेत् भुजगशिशुभृता नाम छन्दः भवति । इन्द्राणीस्तशतीस्तोत्रकाव्ये यथा –

मरुदधिपमनोनाथा मधुकरचिकुरास्माकम् ।
वृजिनविधुतिमाधत्तां विशदहसितलेशेन [22] ।।

### 1.5 पक्तिछन्दः

इन्द्राणीसप्तशतीस्तोत्रकाव्ये पंक्तिः छन्दसः प्रयोगमपि कविना बहु सुन्दरतया कृतम् । अस्य छन्दसः लक्षणं पिङ्गलचार्येण कृतम् यत् - पंक्तिर्जागतौ गायत्रौ च[23] । यदा द्वौ पादौ जागतौ भवतस्तो गायत्रौ च,तदा पंक्तिः नामः छन्दः । अस्य एकः भेदः मयूरसारिणी छन्दः। एतस्य लक्षणं भवति वृत्तरत्नाकरे र्जौ रगौ मयूरसारिणी स्यात्[24] । काव्येऽस्मिन् यथा –

प्रेमवासभूमिरच्छभावस्थानमानमज्जनाघहा मे ।
इन्द्रसुन्दरा मुखाब्जभासी मन्दहास आपादं धुनोतु[25] ।।

### 1.6 त्रिष्टुभ छन्दः

इन्द्राणीसप्तशतीस्तोत्रकाव्ये त्रिष्टुभ् छन्दसः प्रयोगं कविना कृतम् । एतस्य छन्दसः लक्षणं पिङ्गलाचार्येण कृतम् यत् – त्रिष्टुभो रुद्राः[26] । त्रिष्टुभः पादः इत्युक्ते सर्वत्रैकैदशाक्षरो गृह्यते । अस्मिनेवाध्याये परिभाषा एताश्चतस्रः । एतस्य एकः भेदः वृत्तरत्नाकरे वर्तते यत् – अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । अनन्तरमव्यवहितम् उदीरिते उक्ते ये लक्ष्मणी लक्षणे ते भजत इति तौ एवम्भूतौ यदीयौ यत्सम्बन्धिनौ पादौ अर्थात् एकः पादः इन्द्रवज्रा एकादिर्वोपेन्द्रवज्रायाः, ता उपजातयः नाम मताः । काव्येऽस्मिन् यथा –

मन्दोऽपि बोधं विदधन्मुनीनां स्वच्छोऽपि रागं त्रिदशेश्वरस्य ।
अल्पोऽपि धुन्वन्हरितां तामासिं स्मिताङ्कुरो भातु जयन्तमास्तुः ।।

---

14 पिङ्गलसूत्रम्-3.23
15 वृत्तरत्नाकर कारिका-14
16 इन्द्राणीसप्तशतीस्तोत्रकाव्यम् श्लोकः -251 तृतीयमानुष्टुभम शतकम्
17 वृत्तरत्नाकर कारिका-16
18 पिङ्गलसूत्रम्-3.26
19 वृत्तरत्नाकर कारिका-21
20 इन्द्राणीसप्तशतीस्तोत्रकाव्यम् श्लोकः -303 चतुर्थं बार्हतं शतकम्
21 वृत्तरत्नाकरः कारिका- 22
22 इन्द्राणीसप्तशतीस्तोत्रकाव्यम् श्लोकः -326 चतुर्थं बार्हतं शतकम्
23 पिङ्गलसूत्रम्-3.47
24 वृत्तरत्नाकरः कारिका- 25
25 इन्द्राणीसप्तशतीस्तोत्रकाव्यम् श्लोकः -401 पञ्चमं पाङ्क्तं शतकम्
26 पिङ्गलसूत्रम् -3.6

### 1.7 जगती छन्दः

इन्द्राणीसप्तशतीस्तोत्रकाव्ये जगती छन्दसः कवेः प्रयोगचातुरी । एतस्य छन्दसः लक्षणविषये पिङ्गलाचार्येण उक्तमस्ति यत् – जगत्या आदित्याः[27] । एतस्य एकः भेदः द्रुतविलम्बितछन्दः । लक्षणं वृत्तरत्नाकरे यथा -द्रुतविलम्बितमाह नभौ भरौ[28] । नगण-भगणौ, भगण-रगणौ चेद् भवेताम् तद द्रुतविलम्बितम् भवति । काव्येऽस्मिन् प्रयोगं यथा –

सुरमहीरमणस्य विलासिना जलचरध्वजजीवितदायिनी ।
हरतुबोधद्दगावरणं तमो हृदयगं हसितेन सितेन मे[29] ।।

अनेनप्रकारेण वासिष्ठगणपतिमुनिः स्वविरचिते इन्द्राणीसप्तशतीस्तोत्रकाव्ये सप्तवैदिकछन्दसः प्रयोगं कृत्वा काव्यश्री वर्द्धयति तथा वैदिकसाहित्यस्य प्रसारं भवति ।

### सहायकग्रन्थ सूचिका

1. अमरकोषः रामश्री व्याख्या
2. पाणिमीयशिक्षा- चौखम्बासुरभारती प्रकाशन
3. नाट्यशास्त्रम्-चौखम्बा संस्कृत संस्थान ( वारणासि)
4. ऋग्वेद- संस्कृत साहित्य प्रकाशन
5. पिङ्गलसूत्रम्- चौखम्बा विद्या भवनम्
6. वृत्तरत्नाकर- Kashi Sanskrit Series-55
7. इन्द्राणीसप्तशतीस्तोत्रकाव्यम् – Collected works of Vasishta Ganapati Muni Vol-2, Publish V.S Ramanan President,Board Trustees

[27] पिङ्गलसूत्रम् -3.4
[28] वृत्तरत्नाकरः कारिका-50
[29] इन्द्राणीसप्तशतीस्तोत्रकाव्यम् श्लोक-601